# Shri Mallari Stavaraja StotraM

# શ્રીમલ્લારિસ્તવરાજસ્તોત્રં

## Document Information

Text title : Mallari Stavaraja Stotram

File name : mallAristavarAjaH.itx

Category : shiva, stavarAja

Location : doc_shiva

Transliterated by : NA

Proofread by : NA

Latest update : February 10, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

February 11, 2024

*sanskritdocuments.org*

# શ્રીમલ્લારિસ્તવરાજસ્તોત્રં

શ્રીગણેશાયનમઃ ॥

ૐ અસ્ય શ્રી મલ્લારિસ્તવરાજસ્તોત્રમન્ત્રસ્ય સ્કન્દઋષિઃ ।
શ્રીમાર્ત્તણ્ડભૈરવો દેવતા । અનુષ્ટુપ્છન્દઃ ।
મમસકલમનોરથસિધ્યર્થં જપે વિનિયોગઃ ।
નિત્યં નમામિ ભવસાગરતારણાય
મલ્લારિપાદયુગુલં પરમાર્થરૂપમ્ ।
ઇન્દ્રાદિ વન્દિતમશેષસુખપ્રદેયં
ચિન્તામણિં સકલમઙ્ગલકામધેનૂમ્ ॥ ૧॥

સાધૂનાં વીરમલ્લારિમૂર્તિધ્યાનં સુદુર્લભમ્ ।
રૂપં વક્ત્રસમાખ્યાતં કથિતં મુનિસત્તમ ॥ ૨॥

મમવાક્યવિશેષસ્તુ નાસ્તીતિ વચનં તથા ।
અથવાવેદશાસ્ત્રેણ સૂચિતઃ પરમેશ્વરઃ ॥ ૩॥

ભક્ત્યા કાલેષુ ભક્તાનાં ગોચરઃ પરમેશ્વરઃ ।
સ્તુત્યાભ્યાસેનભિસ્તુત્યં મૂર્તિનિસ્થાપિતં શિવમ્ ॥ ૪॥

મણીરત્નગિરૌવાસિ લિઙ્ગરૂપેણ સંસ્થિતમ્ ।
કપાલડમરુખડ્ગં ત્રિશૂલપાત્રમુત્તમમ્ ॥ ૫॥

રતિનેત્રત્રયં નાપિ શિવરૂપેણ ગદ્યતે ।
દૃશ્યતે શાસ્ત્રશાલાયાં મુક્તિક્ષેત્રં શિવાલયમ્ ॥ ૬॥

મલ્લારેર્વિશ્વરૂપત્વં પ્રેમં દર્શનં કલૌ ।
ભુક્તિમુક્તિપ્રદં દેવં મલ્લારિસકલોત્તમમ્ ॥ ૭॥

સ્થિતં વ્રતં ક્રિયાહીનં સેવયા મૃગયાઙ્કિતમ્ ।
અહો ભાગ્યમહોભાગ્યં જીવિતં ન સુજીવિતમ્ ॥ ૮॥

મલ્લારિપદપદ્મેષુ યન્મનો ભ્રમરાય તે ।
ઇત્યેષસહિતો ભાવસ્તતસ્તસ્ય હિતાપ્તલામ્ ॥ ૯॥

દદાતિ દેવમલ્લારિસ્ત્રૈલોક્યં વિજયં શિવમ્ ।
માતા ચૈવ પિતા ચૈવ ભ્રાતા ચૈવ ગુરુસ્તથા ॥ ૧૦॥

બન્ધુશ્ચૈવ સખાચૈવ ભક્તાનાં પરમેશ્વરઃ ।
લોકે મલ્લારિદેવેશ ભૂતપ્રેતાદિ બન્ધનાત્ ॥ ૧૧॥

રાજચોરાદિ બાધાચ દૂરાદેવ પલાયતે ।
અજ્ઞાનાદ્દેવદેવેશ કથં પાપાત્પ્રમુચ્યતે ॥ ૧૨॥

અસ્મિન્લોકે વિનાદેવં તમશ્ચાન્તિર્વિલીયતે ।
હૃદિસ્થં દેવ સંજ્ઞાત્વા તીર્થયાત્રા કરોતિ ચ ॥ ૧૩॥

અજ્ઞાત્વા પ્રાઙ્ગણેઽપ્યર્થં વને મૃગયતેમધૂ ।
યત્કારુણ્યકટાક્ષેયં પાત્ર ભૂતાયદા જનાઃ ॥ ૧૪॥

તદા સકલલોકેષુ બલાદિ વિક્રમાન્વિતમ્ ।
ન્યાસં મધુરમલ્લારે ભક્તપ્રાણસુરેશ્વરઃ ॥ ૧૫॥

વિશ્વવન્દે મહાકાયં પતિતં ભવસાગરે ।
ત્રાહિ ત્રાહિ જગન્નાથ પાર્વતિપ્રાણવલ્લભઃ ॥ ૧૬॥

અનાથરૂપણં દિનં સર્વવ્યાધિનિપીડિતમ્ ।
બ્રૂહિ મે પરમં જ્ઞાનં ભક્તાનાં ભેષજં પરમ્ ॥ ૧૭॥

નમો મલ્લારિદેવાય ભક્તાનાં કામધેનવે ।
સત્યાનૃત્યાય દેવાય લીલાવિક્રમધારિણે ॥ ૧૮॥

નમસ્તે વીરમલ્લારે મકરધ્વજમર્દ્દને ।
સર્વયજ્ઞમયો દેવઃ સર્વતીર્થફલં તથા ॥ ૧૯॥

ગઙ્ગાધરનમસ્તેઽસ્તુ નીલકણ્ઠઃ નમોઽસ્તુ તે ।
સર્વજ્ઞપાર્વતિકાન્તઃ પિનાકી ત્રિપુરાન્તકઃ ॥ ૨૦॥

સ્કન્દ ઉવાચ ।
દેહિકં ચ સુખં દેહિ ઋણવ્યાધિવિવર્જિતમ્ ।
સર્વરોગપ્રશમનં સર્વપાપપ્રણાશનમ્ ॥ ૨૧॥

દેહિત્વમચલાં ભક્તિં તવ પાદાર્ચને રતિમ્ ।

કામક્રોધાદિરહિતં ભુક્તિમુક્તિં પ્રયચ્છ મે ॥ ૨૨॥

ઈશ્વર ઉવાચ ।
સ્તોત્રેણાનેન તુષ્ટોમિ નિત્યં શ્રદ્ધા સમાહિતઃ ।
ધ્રુવં તસ્મૈ મયા દત્તં વીતમત્રં ન સંશયઃ ॥ ૨૩॥

ઇદં યઃ પઠતે ભક્તયા મલ્લારિસ્તોત્રમુત્તમમ્ ।
ન તસ્ય ઘોરપીડાશ્ચ ગ્રહપીડાશ્ચ દારુણઃ ॥ ૨૪॥

દુઃસ્વપ્ના ન પ્રથચ્છન્તિ બાલાનાં શાન્તિકારકમ્ ।
સન્દેહો નાત્ર કર્તવ્યો મલ્લારેર્વચનં ધ્રુવમ્ ॥ ૨૫॥

ઇતિ સ્કન્દપુરાણે અવન્તિકાણ્ડે મલ્લારિસ્તવરાજસ્તોત્રં સમ્પૂર્ણમસ્તુ ।
શ્રીરેણુકેઽર્પણમસ્તુ ।
શ્રીરસ્તુ ।

---

*Shri Mallari Stavaraja StotraM*
pdf was typeset on February 11, 2024

Please send corrections to *sanskrit@cheerful.com*